Sri Sathya Sai Sadhana Trust
Publications Division, Prasanthi Nilayam

# CHAMAKAM

*11th Anuvaka*

एका च मे तिस्रश्च मे

ekā ca me tisraśca me

पञ्च च मे सप्त च मे

pañca ca me sapta ca me

नव च म एकादश च मे

nava ca ma ekādaśa ca me

त्रयोदश च मे पञ्चदश च मे

trayodaśa ca me pañcadaśa ca me

सप्तदश च मे नवदश च म

saptadaśa ca me navadaśa ca ma

एकविग्ंशतिश्च मे त्रयोविग्ंशतिश्च मे

ekavigṁśatiśca me trayovigṁśatiśca me

पञ्चविग्ंशतिश्च मे सप्तविग्ंशतिश्च मे

pañcavigṁśatiśca me saptavigṁśatiśca me

नवविग्ंशतिश्च म एकत्रिग्ंशच्च मे

navavigṁśatiśca ma ekatrigṁśacca me

त्रयस्त्रिग्ंशच्च मे

trayastrigṁśacca me

चतस्रश्च मे

catasraśca me

अष्टौ च मे

aṣṭau ca me

द्वादश च मे षोडश च मे

dvādaśa ca me ṣoḍaśa ca me

विगंशतिश्च मे

vigṁśatiśca me

चतुर्विगं शतिश्च मे

caturvigṁ śatiśca me

अष्टाविगंशतिश्च मे

aṣṭāvigṁśatiśca me

द्वात्रिगंशाच्च मे

dvātrigṁśacca me

षट्त्रिगंशाच्च मे

ṣaṭtrigṁśacca me

चत्वारिगंशाच्च मे

catvārigṁśacca me

चतुश्चत्वारिगंशाच्च मे

catuścatvārigṁśacca me

अष्टाचत्वारिगंशाच्च मे

aṣṭācatvārigṁśacca me

वाजश्च प्रसवश्चा

vājaśca prasavaścā

Sri Sathya Sai Sadhana Trust Publications Division

अपिजश्च क्रतुश्च

apijaśca kratuśca

सुवश्च मूर्धा च

suvaśca mūrdhā ca

व्यश्नियश्च

vyaśniyaśca

अन्त्यायनश्चान्त्यश्च

antyāyanaścāntyaśca

भौवनश्च

bhauvanaśca

भुवनश्चाधिपतिश्च ॥११ ॥

bhuvanaścādhipatiśca ||11||

ॐ इडा देवहूः

om iḍā devahūḥ

मनुर्यज्ञनीः

manuryajñanīḥ

बृहस्पतिरुक्थामदानि

bṛhaspatirukthāmadāni

शग्ंसिषद्विश्वे देवाः

śagṁsiṣadviśve devāḥ

सूक्तवाचः पृथिवि

sūktavācaḥ pṛthivi

मातर्मा मा हिग्ंसीर्

Sri Sathya Sai Sadhana Trust
Publications Division

mātarmā mā higṁsīr

मधु मनिष्ये मधु जनिष्ये

madhu maniṣye madhu janiṣye

मधु वक्ष्यामि मधु वदिष्यामि

madhu vakṣyāmi madhu vadiṣyāmi

मधुमतीं देवेभ्यो

madhumatīṁ devebhyo

वाचमुद्यासगं्

vācamudyāsagṁ

शुश्रूषेण्यां

śuśrūṣeṇyāṁ

मनुष्येभ्यस्तं मा देवा

manuṣyebhyastaṁ mā devā

अवन्तु

avantu

शोभयै पितरोऽनुमदन्तु ॥

śobhayai pitaro'numadantu ||

ॐ शान्तिः शान्तिः शान्तिः ॥

om śāntiḥ śāntiḥ śāntiḥ ||

Sri Sathya Sai Sadhana Trust Publications Division